तारं मायां तथागच्छानुरागिणि मैथुनप्रिये।
वह्निभार्य्या मनुः प्रोक्तः सर्व्वसिद्धिप्रदायकः ॥
एषा मधुमती तु स्यात् सर्व्वसिद्धिप्रदा प्रिये।
गुह्यात् गुह्यतरा विद्या तव स्नेहात प्रकी-
र्त्तिता ॥ ८ ॥

देव्युवाच।

श्रुतञ्च साधनं पुण्यं यक्षिणीनां सुखप्रदम्।
यस्मिन् काले प्रकर्त्तव्यं विधिना केन वा प्रभो।
अत्राधिकारिणः के वा समासेन वदस्व मे ॥

ईश्वर उवाच।

वसन्ते साधयेद्धीमान् हविष्याशी जितेन्द्रियः।
सदा ध्यानपरो भूत्वा तद्दर्शनमहोत्सुकः ॥
उज्जटे प्रान्तरे वापि कामरूपे विशेषतः।
स्थानेष्वेकतमं प्राप्य साधयेत् सुसमाहितः।
अनेन विधिना साक्षात् भविष्यति न संशयः ॥
देव्याश्च सेवकाः सर्व्वे परं चात्राधिकारिणः।
तारकब्रह्मणो भक्त्यं विनाप्यत्राधिकारिणः ॥"
इति तन्त्रसारे योगिनीसाधनप्रकरणं समाप्तम् ॥
दशविधदशान्तर्गतदशाविशेषः। यथा,—
"स्वनक्षत्रं ध्रुवं कृत्वा पञ्च तत्र विमिश्रयेत्।
मङ्गलेन हृतः शेषो मङ्गलादिविनिश्चयः ॥
मङ्गला पिङ्गला धन्या भ्रामरी भद्रिका तथा।
उल्का सिद्धा सङ्कटा च योगिन्यष्टौ प्रकीर्त्तिताः॥
अब्देकं मङ्गला धत्ते शेषास्त्वेकैकवर्द्धिकाः।
पुनस्त्वर्काग्निवर्त्तन्ते चक्रवत् परिवर्त्तनात् ॥"
अपि च।
"रोहिण्यादौ त्रिरावृत्त्या मङ्गलादौ यथाक्रमम्।
उल्का सिद्धा सङ्कटा च अश्विन्यादित्रये पुनः ॥"
एतासामन्तर्दशा।
"दशावर्षन्तु षट्त्रिंशद्भागं कृत्वा विनिर्द्दिशेत्।
यत्तु यस्या हि यद्वर्षं तत्तद्भागं प्रकीर्त्तितम् ॥"
फलं यथा,—
"मङ्गला मङ्गलं धत्तेऽतुलभोगं सुखं तथा।
गोगजाश्वसहस्राणि गृहे तस्य दिने दिने ॥
पिङ्गला विविधं दुःखमन्नचिन्तादिसम्भवम्।
ददाति नाशं शत्रुभ्यो धनधान्यगजादिकम् ॥
धन्या च सततं दत्ते सर्व्वत्र विजयादिकम्।
शत्रुभ्यो रक्षते नित्यं मातृवत् परिपालयेत् ॥
भ्रामरी विविधं दुःखमन्तःसम्भ्रमसम्भवम्।
अकस्मात्तस्य दुर्द्दैवं विधिना प्रेरितं भवेत् ॥
भद्रिका विविधान् धत्ते सम्मानादिमनोरथान्।
तुष्टा चेद्भद्रिका नित्यं दुर्ग्रहः सुग्रहायते ॥
उल्का चाधिकरी प्रोक्ता नित्यं नानाभयप्रदा।
उल्का यदि समायाति सुग्रहो दुर्ग्रहायते ॥
सिद्धा च साधयेत् सर्व्वं मन्त्रारम्भधनादिकम्।
यस्य तुष्टा भवेत् सिद्धा लक्ष्मीस्तस्य करे स्थिता ॥
सङ्कटा सङ्कटं दत्ते भुङ्क्ते धान्यधनादिकम्।
सैव भार्य्या सदा नित्यं गृही लक्ष्याः फणी यथा ॥"
इत्युद्बोधचन्द्रिका ॥

योगी, [न्] पुं, (योगः अस्त्यस्येति। योग + इनिः। यद्वा, युज समाधौ। युजिर् योगे वा + "संपृचानुरुधात।" ३।२।१४२। इति घिनुण्।) योगयुक्तः। तस्य लक्षणादि यथा,—
"स्वर्णे लोष्टे गृहेऽरण्ये सुस्निग्धे चन्दने तथा।
समता भावना यस्य स योगी परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ अध्यायः ॥
अपि च।
"आत्मौपम्येन सर्व्वत्र समं पश्यति योऽर्ज्जुन!।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥"
इति श्रीभगवद्गीतायाम् ७ अध्यायः ॥
अन्यच्च।

ऋषय ऊचुः।

"भगवन्! देवतारिघ्न! हिरण्याक्षनिसूदन!।
चत्वारो ह्याश्रमाः प्रोक्ता योगी नाम क
उच्यते ॥
सर्व्वकर्म्माणि संन्यस्य समाधिमचलं श्रितः।
य आस्ते निश्चलो योगी स सन्न्यासी न पञ्चमः॥
सर्व्वेषामाश्रमाणान्तु द्वैविध्यं श्रुतिदर्शितम्।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत्।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
उदासीनसाधकश्च गृहस्थो द्विविधो भवेत्।
ऋणानि त्रीण्युपाहृत्य त्यक्त्वा भार्य्याधनादिकम्॥
एकाकी यस्तु विचरेदुदासीनः स मोक्षिकः।
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत् ॥
तपस्तप्यति योऽन्येन यजेद्देवान् जुहोति च।
स्वाध्याये चैव निरतो वनस्थस्तापसो मतः ॥
तपसा कर्षितोऽत्यर्थं यस्तु ध्यानपरो भवेत्।
सन्न्यासिकः स विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥
योगाभ्यासरतो नित्यमारुरुक्षुर्ज्जितेन्द्रियः।
ज्ञानाय वर्त्तते भिक्षुः प्रोच्यते परमेष्ठिकः ॥
यस्त्वात्मरतिरेव स्यान्नित्यतृप्तो महामुनिः।
सम्यग्दर्शनसम्पन्नः स योगी भिक्षुरुच्यते ॥
ज्ञानसन्न्यासिनः केचिद्वेदसन्न्यासिनः परे।
कर्म्मसन्न्यासिनः केचिद्विविधाः परमेष्ठिकाः ॥
योगी च त्रिविधो ज्ञेयो भौतिकः सांख्य एव च।
तृतीयोऽन्याश्रमी प्रोक्तो योगमुत्तममास्थितः ॥"
इति कौर्म्मे २ अध्यायः ॥
(तेषां स्त्रीसङ्गनिषेधो यथा,—
"यदि सङ्गं करोत्येव बिन्दुस्तस्य विनश्यति।
आयुःक्षयो बिन्दुहीनादसामर्थ्यञ्च जायते ॥
तस्मात् स्त्रीणां सङ्गवर्ज्यं कुर्य्यादभ्यासमाद-
रात्।
योगिनोऽङ्गस्य सिद्धिः स्यात् सततं बिन्दुधार-
णात् ॥"
इति दत्तात्रेयसंहिता ॥
तेषां पथ्यं यथा, हठयोगप्रदीपिकायाम्।
"गोधूमशालियवषष्टिकशोभनान्नं
क्षीराज्यखण्डनवनीतसितामधूनि।
शुण्ठीकपोलकफलादिकपञ्चशाकं
मुद्गादिदिव्यमुदकञ्च यमीन्द्रपथ्यम् ॥"
तेषामपथ्यं यथा, तत्रैव।
"कट्वम्लतिक्तलवणोष्णहरीतशाक
सौवीरतैलतिलसर्षपमत्स्यमद्यम्।
आजादिमांसदधितक्रकुलत्थकोल-
पिन्याकहिङ्गुलशुनाद्यमपथ्यमाहुः ॥")

योगीश्वरः, पुं, (योगिनामीश्वरः।) याज्ञवल्क्य-मुनिः। (इति हेमचन्द्रे योगेशशब्ददर्शनात्। ३। ८५१ ॥) यथा,—
"योगीश्वरं याज्ञवल्क्यं सम्पूज्य मुनयोऽब्रुवन्।
वर्णाश्रमेतराणां नो ब्रूहि धर्म्मानशेषतः ॥"
"योगिनां सनकादीनां ईश्वरः श्रेष्ठस्तं याज्ञ-वल्क्यं संपूज्य।" इति मिताक्षरा ॥ त्रि, यगिनां श्रेष्ठः। (यथा, मार्कण्डेये। ६६। २८।
"यजन्ति यानस्तमलैर्मनोभि-
र्योगीश्वराः क्लेशविमुक्तिहेतून् ॥")

योगीश्वरी, स्त्री, (योगिनामीश्वरी।) दुर्गा। यथा,—
"योगिशक्रादयो देवाः सनकान्तास्तपोधनाः।
तेषां स्वामी तथा योगी ईश्वरी प्रभुपालना ॥
आत्मेन्द्रियमनादीनां संयोगो योग उच्यते।
तेषां वा योजनाद्योगी योगैश्वर्य्यविबोधना ॥"
इति देवीपुराणे ४५ अध्यायः ॥

योगेशः, पुं, (योगस्य ईशः ईश्वरः।) याज्ञ-वल्क्यः। इति हेमचन्द्रः। ३। ८५१ ॥ (योगे-श्वरे, त्रि। यथा, भागवते। ४। १९। ६।
"कपिलो नारदो दत्तो यगेशाः सनकादयः।
तमन्वीयुर्भागवता ये च तत्सेवनोत्सुकाः ॥")

योगेश्वरः, पुं, (योगानां ईश्वरः।) श्रीकृष्णः। यथा,—
"ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्म्मवर्म्मणि।
स्वां काष्ठामधुनोपेते धर्म्मः कं शरणं गतः ॥"
इति श्रीभागवते १ स्कन्धे १ अध्यायः ॥
(शिवः। यथा, महाभारते। १३। १४। ३२३।
"नमस्ते भगवन् देव! नमस्ते भक्तवत्सल!।
योगेश्वर! नमस्तेऽस्तु नमस्ते विश्वसम्भव! ॥"
देवहोत्रतनयः। यथा, भागवते। ८। १३। ३२।
"देवहोत्रस्य तनय उपहर्त्ता दिवस्पतेः।
योगेश्वरो हरेरंशो बृहत्यां सम्भविष्यति ॥"

योगेश्वरी, स्त्री, वन्ध्याकर्कोटकी। इति भाव-प्रकाशः॥ (योगानामीश्वरी। दुर्गा। यथा,—
"त्वञ्च योगेश्वरी तथा—।" इति चण्डीकव-चम् ॥ योगयुक्ते, त्रि। यथा, मार्कण्डेये। ६७। ८।
"प्रजापतेः कश्यपाय सोमाय वरुणाय च।
योगेश्वरेभ्यश्च सदा नमस्यामि कृताञ्जलिः ॥")

योगेष्टं, क्ली, (योगे सन्धिच्छिद्रादिपूरणे इष्टम्।) सीसकम्। इत्यमरः। २। ९। १०५ ॥ (तथास्य पर्य्यायः।
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

योग्यं, क्ली, (योज्यत इति। युज् + णिच् + ण्यत्।) ऋद्धिनामौषधम्। वृद्धिनामौषधम्। इत्य-मरः। २। ४। ११२ ॥

योग्यः, त्रि, (योगाय प्रभवति। योग + "योगाद्-यच्च।" ५। १। १०२। इति यत्।) प्रवीणः। योगार्हः। (यथा, रघुः। ६। २६।